च व्यक्तिभेदो मन्वादिष्वप्युक्तः। यथा मनौ समष्टिपुरुषस्य षडिन्द्रियोत्पत्त्यनन्तरम्। "तेषां त्ववयवान् सूक्ष्मान् षण्णामप्यमितौजसाम्। सन्निवेश्यात्ममात्रासु सर्वभूतानि निर्ममे" इति षण्णामिति समस्तलिङ्गशरीरोपलक्षणम्। आत्ममात्रासु चिदंशेषु संयोज्येत्यर्थः। तथा च तत्रैव वाक्यान्तरम्। "तच्छरीरसमुत्पन्नैः कार्यैस्तैः करणैः सह। क्षेत्रज्ञाः समजायन्त गात्रेभ्यस्तस्य धीमतः"। इति नन्वेवं भोगायतनतया लिङ्गस्यैव शरीरत्वे स्थूले कथं शरीरत्वव्यवहारस्तत्राह।"तदधिष्ठानाश्रये देहे तद्वादात् तद्वादः" सू०। तस्य लिङ्गस्य यदधिष्ठानमाश्रयो वक्ष्यमाणभूतपञ्चकं तस्याश्रये षाट्कौशिके देहे तद्वादो देहवादस्तद्वादात् तस्याधिष्ठानशब्दोक्तस्य देहस्य वादादित्यर्थः लिङ्गसम्बन्धादधिष्ठानस्य देहत्वमधिष्ठानाश्रयत्वाच्च स्थूलस्य देहत्वमिति पर्यवसितोऽर्थः। अधिष्ठानशरीरं च सूक्ष्मपञ्चभूतात्मकं वक्ष्यते तथा च शरीरत्रयं सिद्धम्। यत् तु "आतिवाहिक एकोऽस्ति देहोऽन्यस्त्वाधिभौतिकः। सर्वासां भूतजातानां ब्रह्मणस्त्वेक एव किम्" इत्यादिशास्त्रेषु शरीरद्वयमेव श्रूयते तल्लिङ्गशरीराधिष्ठानशरीरयोरन्योऽन्यनियतत्वेन सूक्ष्मत्वेन चैकताभिप्रायादिति। ननु षाट्कौशिकातिरिक्ते लिङ्गशरीराधिष्ठानभूते शरीरान्तरे किं प्रमाणमित्याकाङ्क्षायामाह।"न स्वातन्त्र्यात् तदृते छायावच्चित्रवच्च" सू०। "तल्लिङ्गशरीरं तदृतेऽधिष्ठानं विना स्वातन्त्र्यान्न तिष्ठति। यथा छाया निराधारा न तिष्ठति यथा वा चित्रमित्यर्थः तथा च स्थूलदेहं त्यक्त्वा लोकान्तरगमने लिङ्गदेहस्याधारभूतं शरीरान्तरं सिध्यतीति भावः। तस्य च स्वरूपं कारिकायामुक्तम्। "सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः। सूक्ष्मास्तेषां नियता मातापितृजा निवर्त्तन्ते" इति। अत्र तन्मात्रकार्यं मातापितृजशरीरापेक्षया सूक्ष्मं यद्भूतपञ्चकं यावल्लिङ्गस्थायि प्रोक्तं तदेव लिङ्गाधिष्ठानं शरीरमिति लब्धं कारिकान्तरेण। "चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया। तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्"। इति। विशेषैः स्थूलभूतैः सूक्ष्माख्यैः, स्थूलावान्तरभेदैरिति यावत्। अस्यां कारिकायां सूक्ष्माख्यानां स्थूलभूतानां लिङ्गशरीराङ्गत्वावगमेन "पूर्वोत्पन्नमसक्तं नियतं महदादि सूक्ष्मपर्यन्तम्"। इत्यादिपूर्वोदाहृतकारिकायां सूक्ष्मभूतपर्यन्तस्य लिङ्गत्वं नार्थः किन्तु महदादिरूपं यल्लिङ्गं तत् साधारसूक्ष्मपर्यन्तं संसरति तेन सह संसरतीत्यर्थः। नन्वेवं लिङ्गघटकपदार्थाः कियन्त इति कथमवधार्यमिति चेत्। "वासनाभूतसूक्ष्मं च कर्माविद्ये तथैव च। दशेन्द्रियं मनो बुद्धिरेतल्लिङ्गं विदुर्बुधाः इति वाशिष्ठादिवाक्येभ्यः। अत्र लिङ्गशरीरप्रतिपादनेनैव पुर्यष्टकमपि व्याख्येयमित्याशयेन बुद्धिधर्माणामपि वासनाकर्माविद्यानां पृथगुपन्यासः। भूतसूक्ष्मं चात्र तन्मात्रा। दशेन्द्रियाणि च ज्ञानकर्मेन्द्रियभेदेन पुरीद्वयमित्याशयः। यत् तु मायावादिनो लिङ्गशरीरस्य तन्मात्रस्थाने प्राणादिपञ्चकं प्रक्षिपन्ति पुर्यष्टकं चान्यथा कल्पयन्ति तदप्रामाणिकमिति। ननु मूर्त्तद्रव्यतया वाय्वादेरिव लिङ्गस्याकाशमेवासङ्गेनाधारोऽस्तु व्यर्थमन्यत्र सङ्गकल्पनमिति तत्राह। "मूर्त्तत्वेऽपि न सङ्घातयोगात् तरणिवत्" सू०। मूर्त्तत्वेऽपि न स्वातन्त्र्यादसङ्गतयावस्थानं प्रकाशरूपत्वेन सूर्यस्येव सङ्घातसङ्गानुमानादित्यर्थः। सूर्यादीनि सर्वाणि तेजांसि पार्थिवद्रव्यसङ्गेनैवावस्थितानि दृश्यन्ते लिङ्गं च सत्त्वप्रकाशमयमतो भूतसङ्गतमिति। लिङ्गस्य परिमाणमवधारयति। "अणुपरिमाणं तत्कृतिश्रुतेः" सू०। तल्लिङ्गमणुपरिमाणं परिच्छिन्नं न त्वत्यन्तमेवाणु सावयवत्वोक्तत्वात्। कुतः कृतिश्रुतेः क्रियाश्रुतेः। "विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च" इत्यादिश्रुतेर्विज्ञानाख्यबुद्धिप्रधानतया विज्ञानस्य लिङ्गस्याखिलकर्मश्रवणादित्यर्थः। विभुत्वे सति क्रिया न सम्भवति। तद्गतिश्रुतेरिति पाठस्तु समीचीनः। लिङ्गशरीरस्य च गतिश्रुतिः "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सविज्ञानो भवति सविज्ञानमेवानूत्क्रामतीति" सविज्ञानो बुद्धिसहित एव जायते सविज्ञानं यथा स्यात् यथा संसरति चेत्यर्थः। परिच्छिन्नत्वे युक्त्यन्तरमाह। "तदन्नमयत्वश्रुतेश्च" सू० तस्य लिङ्गस्यैकदेशतोऽन्नमयत्वश्रुतेर्न विभुत्वं सम्भवतीति। विभुत्वे सति नित्यतापत्तेरित्यर्थः। सा च श्रुतिः "अन्नमयं हि सौम्य! मन आपोमयः प्राणस्तेजोमयी वागित्यादिः"। यद्यपि मन आदीनि न भौतिकानि तथाप्यन्नसंसृष्टसजातीयांशपूरणादन्नमयत्वादिव्यवहारो बोध्यः। अचेतनानां लिङ्गानां किमर्थं संसृतिर्देहाद्देहान्तरसञ्चार इत्याशङ्कायामाह। "पुरुषार्थं संसृतिर्लिङ्गानां सूपकारवद्राज्ञः" सू० यथा राज्ञः सूपकाराणां पाकशालासु सञ्चारो राजार्थं तथा लिङ्गशरीराणां संसृतिः पुरुषार्थमित्यर्थः" प्र०भाष्यम्। सूक्ष्मदेहसत्त्वे प्रमाणं सांख्यतत्त्वकौमुद्यामित्थं दर्शितम्।